श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये चतुश्चत्वारिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये चतुश्चत्वारिंशं दशकम् ॥

## जातकर्मनामकरणवर्णनम्

गूढं वसुदेवगिरा
    कर्तुं ते निष्क्रियस्य संस्कारान्।
हृद्गतहोरातत्त्वो
    गर्गमुनिस्त्वद्गृहं विभो गतवान्॥ **44.1** ॥

नन्दोऽथ नन्दितात्मा
    वृन्दिष्टं मानयन्नमुं यमिनाम्।
मन्दस्मितार्द्रमूचे
    त्वत्संस्कारान् विधातुमुत्सुकधीः॥ **44.2** ॥

यदुवंशाचार्यत्वात्
    सुनिभृतमिदमार्य कार्यमिति कथयन्।
गर्गो निर्गतपुलक -
    श्चक्रे तव साग्रजस्य नामानि॥ **44.3** ॥

कथमस्य नाम कुर्वे
    सहस्रनाम्नो ह्यनन्तनाम्नो वा।
इति नूनं गर्गमुनि -
    श्चक्रे तव नाम नाम रहसि विभो॥ **44.4** ॥

कृषिधातुणकाराभ्यां
    सत्तानन्दात्मतां किलाभिलपत्।

जगदघकर्षित्वं वा
    कथयदृषिः कृष्णनाम ते व्यतनोत्॥ **44.5** ॥

अन्यांश्च नामभेदान्
    व्याकुर्वन्नग्रजे च रामादीन्।
अतिमानुषानुभावं
    न्यगदत्त्वामप्रकाशयन् पित्रे॥ **44.6** ॥

स्निह्यति यस्तव पुत्रे
    मुह्यति स न मायिकैः पुनः शोकैः।
द्रुह्यति यस्स तु नश्ये -
    दित्यवदत् ते महत्त्वमृषिवर्यः॥ **44.7** ॥

जेष्यति बहुतरदैत्यान्
    नेष्यति निजबन्धुलोकममलपदम्।
श्रोष्यति सुविमलकीर्ती -
    रस्येति भवद्विभूतिमृषिरूचे॥ **44.8** ॥

अमुनैव सर्वदुर्गं
    तरितास्थ कृतास्थमत्र तिष्ठध्वम्।
हरिरेवेत्यनभिलप -
    न्नित्यादि त्वामवर्णयत् स मुनिः॥ **44.9** ॥

गर्गेऽथ निर्गतेऽस्मिन्
    नन्दितनन्दादिनन्द्यमानस्त्वम्।
मद्गदमुद्गतकरुणो
    निर्गमय श्रीमरुत्पुराधीश॥ **44.10** ॥

॥ इति श्रीमन्नारायणीये चतुश्चत्वारिंशं दशकं समाप्तम्॥